Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३९१

Title सांख्य कारिका.

Author श्री ईश्वर कृष्ण:

Extent ३ Age ५

Subject सांख्य

© Dharmartha Trust J&K. Digitized by eGangotri

सांख्यकारिकाः

धतूणा

4391

F - 3

पूर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः॥ दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ॰ दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॰१ दृष्टवदानुश्र
विकः स ह्यविशुद्धिक्षयातिशययुक्तः॥ तद्विपरीतः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात्॰२ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति
विकृतयः सप्त॰ षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥३ दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्॰ त्रिवि
धं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॰४॥ प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं॰ तल्लिङ्गलिङ्गिपूर्वकमा
प्तश्रुतिराप्तवचनं तु॰५॥ सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्॰ तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं॰६॥ अति
दूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्॰ सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च॰७॥ सौक्ष्म्यात्तदनुपलब्धिर्नाभावा
त्कार्यतस्तदुपलब्धेः॥ महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च॰८॥ असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्॰ शक्त
स्य शक्यकरणात्कारणभावाच्च सत्कार्यं॰९॥ हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं॰ सावयवं परतन्त्रं व्यक्तं विपरीत
मव्यक्तं॰१०॥ त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि॰ व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॰११॥ प्रीत्यप्री
तिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः॥ अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥१२॥ सत्त्वं लघु प्रकाशकमिष्ट
मुपष्टम्भकं चलं च रजः॥ गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥१३॥ अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात्॰ का
रणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धं॰१४॥ भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च॰ कारणकार्यविभागादवि
भागाद्वैश्वरूप्यस्य॰१५॥ कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च॰ परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्॰१६॥

शिवः

१

© Dharmartha Trust J&K. Digitized by eGangotri

संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् पुरुषोस्ति भोक्तृभावात्कैवल्यार्थप्रवृत्तेश्च १७ जन्ममरणकरणानां प्रतिनियमादयुग
पत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव १८ तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य कैवल्यं माध्यस्थं द्रष्टृत्वम
कर्तृभावश्च १९ तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वे च तथा कर्त्ता भवत्युदासीनः २० पुरुषस्य दर्शनार्थं कैवल्यार्थं त
था प्रधानस्य पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः २१ प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्
पंचभ्यः पंचभूतानि २२ अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं सात्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं २३ अभिमानोऽहंकारस्त
स्माद्द्विविधः प्रवर्त्तते सर्गः एकादशकश्च गणस्तन्मात्रपंचकश्चैव २४ सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस्तन्मा
त्रः स तामसस्तैजसादुभयं २५ बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः २६
उभयात्मकमत्र मनः संकल्पकमिंद्रियं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च २७ शब्दादिषु पंचानामालोचनमा
त्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदाश्च पंचानां २८ स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या सामान्यकरणवृत्तिः प्रा
णाद्या वायवः पंच २९ युगपच्चतुष्टयस्य वृत्तिः क्रमशश्च तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ३० स्वां स्वां प्रतिपद्यं
ते परस्पराकूतहेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं ३१ करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं कार्यं च
तस्य दशधाहार्यं धार्यं प्रकाश्यं च ३२ अंतःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं ३३
बुद्धीन्द्रियाणि तेषां पंच विशेषाविशेषविषयाणि वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि ३४ सांतःकरणा बुद्धिः सर्वं वि
षयमवगाहते यस्मात् तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ३५ एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः कृत्स्नं पु
रुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंति ३६ सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं ३७

© Dharmartha Trust J&K. Digitized by eGangotri

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंच पंचभ्यः। एते स्मृता विशेषाः शांता घोराश्च मूढाश्च ।३८। सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशे
षाः स्युः। सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ।३९। पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यंतं। संसरति निरुपभोगं भावैरधि
वासितं लिंगं ।४०। चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिंगं ।४१। पुरुषार्थहेतुकमिदं निमि
त्तनैमित्तिकप्रसंगेन। प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं ।४२। सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः। दृष्टाः
करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ।४३। धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण। ज्ञानेन चापवर्गो विपर्ययादिष्यते बं
धः ।४४। वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात्। ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ।४५। एष प्रत्ययसर्गो विपर्यया
शक्तितुष्टिसिद्ध्याख्यः। गुणवैषम्यविमर्दात्तस्य च भेदास्तु पंचाशत् ।४६। पंच विपर्ययभेदा भवंत्यशक्तिश्च करणवैकल्यात्। अ
ष्टाविंशतिभेदास्तुष्टिर्नवधाऽष्टधा सिद्धिः ।४७। भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः। तामिस्रोऽष्टादशधा तथा भवत्यंधता
मिस्रः ।४८। एकादशेंद्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां ।४९। आध्यात्मिकाश्चतस्रः प्र
कृत्युपादानकालभाग्याख्याः। बाह्या विषयोपरमात्पंच नव तुष्टयोऽभिहिताः ।५०। ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानं च [redacted] सिद्धयोऽष्टौ सिद्धेः पूर्वोंकुशस्त्रिविधः ।५१। न विना भावैर्लिंगं न विना लिंगेन भावनिर्वृत्तिः। लिंगाख्यो भावाख्यस्तस्माद्द्विविधः
प्रवर्तते सर्गः। अष्टविकल्पो दैवस्तैर्यग्योनिश्च पंचधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ।५३। ऊर्ध्वं सत्त्वविशालस्तमोविशा
लश्च मूलतः सर्गः। मध्ये रजोविशालो ब्रह्मादिस्तंबपर्यंतः ।५४। तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। लिंगस्याविनिवृत्तेस्त
स्माद्दुःखं स्वभावेन ।५५। इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यंतः। प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः ।५६। वत्सवि
वृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।५७। औत्सुक्यविनिवृत्त्यर्थं क्रियासु प्रवर्तते लोकः। शिवः

© Dharmartha Trust J&K. Digitized by eGangotri

पुरुषस्यविमोक्षार्थंप्रवर्त्तते॰मोक्षः।५८। रंगस्यदर्शयित्वानिवर्त्ततेनर्त्तकी[redacted]यथानृत्यात् पुरुषस्यतथात्मानंप्रकाश्यविनिवर्त्तते
प्रकृतिः।५९। नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्यसतस्तस्यार्थमपार्थकंचरति॰६०। प्रकृतेःसुकु
मारतरंनकिंचिदस्तीतिमेमतिर्भवति॰याद्दृष्टास्मीतिपुनर्नदर्शनमुपैतिपुरुषस्य॰६१। तस्मान्नबध्यतेनापिमुच्यतेनापिसंसरति
कश्चित्॰ संसरतिबध्यतेचमुच्यतेचनानाश्रयाप्रकृतिः।६२। रूपैःसप्तभिरेवंबध्नात्यात्मानमात्मनाप्रकृतिः। सैवचपुरुषस्या
र्थंप्रतिमोचयत्येकरूपेण॰६३। एवंतत्वाभ्यासान्नास्मिनमेनाहमित्यपरिशेषं॰ अविपर्ययाद्विशुद्धंकेवलमुत्पद्यतेज्ञानं॰६४। तेन
निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां॰ प्रकृतिंपश्यतिपुरुषःप्रेक्षकवदवस्थितःस्वस्थः।६५। दृष्टामयेत्युपेक्षकएको
दृष्टाहमित्युपरमत्यन्या॰ सतिसंयोगेपितयोःप्रयोजनंनास्तिसर्गस्य॰६६। सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ॰ तिष्ठ
तिसंस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः।६७। प्राप्तेशरीरभेदेचरितार्थत्वात्प्रधानविनिवृत्तौ॰ ऐकांतिकमात्यंतिकमुभयंकेवल्य
माप्नोति॰६८। पुरुषार्थज्ञानमिदंगुह्यंपरमर्षिणासमाख्यातं॰ स्थित्युत्पत्तिप्रलयाश्चिंत्यंतेयत्रभूतानां॰६९। एतत्पवित्रमग्र्यं
मुनिनासुरयेऽनुकंपयाप्रददे॰ आसुरिरपिपंचशिखायतेनचकृतंतंत्रं॰७०। शिष्यपरंपरागतमीश्वरकृष्णेनचैतदा
र्याभिः। संक्षिप्तमार्यमतिनासम्यग्विज्ञायसिद्धांतं॰७१। सप्तत्यांकिलयेऽर्थास्तेऽर्थाःकृत्स्नस्यषष्टितंत्रस्य॰ आख्यायिका
विरहिताःपरवादविवर्ज्जिताश्चापि॰७२॥ ॥इतीश्वरकृष्णकृतासांख्यकारिकासमाप्ता॰ ॥सं॰१९२२ रामोजयति॰

© Dharmartha Trust J&K. Digitized by eGangotri